# Shri Tunga Ashtakam

# શ્રીતુઙ્ગાષ્ટકમ્

## Document Information

Text title : Shri Tunga Ashtakam

File name : tungAShTakam.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI, aShTaka

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# શ્રીતુઙ્ગાષ્ટકમ્

તુઙ્ગા તુઙ્ગતરઙ્ગવેગસુભગા ગઙ્ગાસમા નિમ્નગા
  રોગાન્તાઽવતુ સહ્યસંજ્ઞિતનગાજ્જાતાપિ પૂર્વાબ્ધિગા ।
રાગાદ્યાન્તરદોષહૃદ્વરભગા વાગાદિમાર્ગાતિગા
  યોગાદીષ્ટસુસિદ્ધિદા હતભગા સ્વઙ્ગા સુવેગાપગા ॥ ૧॥

સ્વસા કૃષ્ણાવેણીસરિત ઉત વેણીવસુમણી-
  પ્રભાપૂતક્ષોણીચકિતવરવાણીસુસરણિઃ ।
અશેષાઘશ્રેણીહૃદખિલમનોધ્વાન્તતરણિર્દૃઢા
  સ્વર્નિશ્રેણિર્જયતિ ધરણીવસ્ત્રરમણી ॥ ૨॥

દૃઢં બધ્વા ક્ષિપ્તા ભવજલનિધૌ ભદ્રવિધુતા
  ભ્રમચ્ચિત્તાસ્ત્રસ્તા ઉપગત સુપોતા અપિ ગતાઃ ।
અધોધસ્તાન્ભ્રાન્તાન્પરમકૃપયા વીક્ષ્ય તરણિઃ
  સ્વયં તુઙ્ગા ગઙ્ગાભવદશુભભઙ્ગાપહરણી ॥ ૩॥

વર્ધા સધર્મા મિલિતાત્ર પૂર્વતો ભદ્રા કુમુદ્વત્યપિ વારુણીતઃ ।
તન્મધ્યદેશેઽખિલપાપહારિણી વ્યાલોકિ તુઙ્ગાઽખિલતાપહારિણી ॥ ૪॥

ભદ્રયા રાજતે કીત્ર્યા યા તુઙ્ગા સહ ભદ્રયા ।
સન્નિધિં સા કરોત્વેતં શ્રીદત્તં લઘુસન્નિધિમ્ ॥ ૫॥

ગઙ્ગાસ્નાનં તુઙ્ગાપાનં ભીમાતીરે યસ્ય ધ્યાનં
  લક્ષ્મીપુર્યાં ભિક્ષાદાનં કૃષ્ણાતીરે ચાનુષ્ઠાનમ્ ।
સિંહાખ્યાદ્રૌ નિદ્રાસ્થાનં સેવા યસ્ય પ્રીત્યા ધ્યાનં
  સદ્ભક્તાયાક્ષય્યં દાનં શ્રીદત્તાસ્યાસ્યાસ્તુ ધ્યાનમ્ ॥ ૬॥

(ગોમૂત્રિકાબન્ધ)

તુઙ્ગાપગા મહાભઙ્ગા પાતુ પાપવિનાશિની ।
રાગાતિગા મહાગઙ્ગા જન્તુતાપવિનાશિની ॥ ૭॥

(હારબન્ધઃ)
હર પરમરયે સમસ્તમદામયાન્
ખલબલદલનેઽઘમપ્યમલે મમ ।
હરસિ રસરસે સમસ્તમનામલં
કુરુ ગુરુકરુણાં સમસ્તમતે મયિ ॥ ૮॥

વેગાતુઙ્ગાપગાઘં હરતુ રથરયા દેવદેવર્ષિવન્દ્યા
વારં વારં વરં યજ્જલમલમલઘુપ્રાશને શસ્તશર્મ ।
શ્રીદત્તો દત્તદક્ષઃ પિબતિ બત બહુ સ્યાઃ પયઃ પદ્મપત્રા-
ક્ષીં તામેતામિતાર્થાં ભજ ભજ ભજતાં તારકાં રમ્યરમ્યામ્ ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં તુઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Tunga Ashtakam*
pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*